19E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत विशारद (बी.ए.) बहि:स्थ

## परीक्षा: जानेवारी – २०२३

## सत्र ४ थे

**विषय: भारतचम्पू** (19E444)

**दिनांक:** १६/०१/२०२३ **गुण : ८०** **वेळ : स. १०.०० ते १.००**

**सूचना:** १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१. केषामपि त्रयाणां स्वाभाषया अनुवादं करणीयम्।** **(२१)**

१) अपरेद्युरपि पुनराजीवन्तं निद्रारुणनयनराजीवं तं स मुग्धधी: स्निग्ध इव जग्धिकेलिकायामारालिककरदापितकवलनिचोलितकरालगरलविह्वलं प्रह्वलम्बिशिरसं रज्जुभि: परिणाह्य परिणाहिनीभिरसुहृदि हृदि शूलं शूलकीलिते निर्जरसरिदन्तर्जले विसर्जयामास।।

२) एकदा सायमन्तगृहे निरवग्रहं निष्पतद्भिर्बाष्पैस्तरङ्गितोत्तमाङ्गमुत्सङ्गभुवि परत्युरपशयं पुरोधाय यातुधानापराधभयानुरोधेन मन्दितं क्रन्दितमुत्सृजन्तीं कुन्ती समुपसृत्यविषादनिदानं विप्रायताक्षमप्राक्षीत्। सापि तां कृपालुतया हृदि लगद्गदां गद्गदाक्षरमाचचक्षे।।

३) सन्तानमूलमिदमेकमपत्यामास्ते सवर्तकालसहजश्च स राक्षसेन्द्र:।
सम्भूयते च समय: क्षपया महत्या सन्तीर्यतां कथमियं सखि मे विपत्ति:।

४) अहं किमम्बा किमभीष्टतापदे तवेति मातुर्धुरि तातपृच्छया।
प्रलोभतुल्यं प्रवदन्तमर्भकं मुदा हसञ्जिघ्रति मूर्ध्नि पुण्यभाक्।।

५) तुहिनकिरणवंशस्थूलमुक्ताफलानां विपुलभुजविराजद्वीरलक्ष्मीविभून्नाम्।
हसितसुरपुरश्रीरस्ति सा हस्तिनाख्या रिपुजनदुरवापा राजधानी कुरूणाम्।।

**प्र.२. त्रयाणां वाक्यानां संसदर्भ स्पष्टीकरणं लिखत।** **(२१)**

१) निन्द्यन्ते पितृभिस्तप्तैर्निरपत्यधन: पुमान्।

२) सिद्धान्तोऽभूद्दिवि भुवि बुधै: श्लाघित: सव्यसाची।

३) मलिनतामनयन्त कलेवरं मदकला: कलभा इव धूलिभि:।

४) पञ्चतामपि परां धनञ्जयप्रापणेन जतुधाम्नि मेनिरे।

५) नयानाम्बुभि: स विदधे लोकं नदीमातृकम्।

**प्र.३. सविस्तरं द्वौ लिखत।** **(२८)**

१) लाक्षागृहवृत्तान्त:

२) बकासुरनाश:

३) किन्दमशाप:

**प्र.४. अ) रूपपरिचयं लिखत।** **(०४)**

१) धार्यमाणम्

२) समीक्ष्य

३) रहसि

४) एतस्मै

**आ) संधिविग्रहं कुरुत।** **(०३)**

१) तन्निदेशादहानि

२) हिमवतोऽवजगाहे

३) निष्पतद्भिर्बाष्पैस्तरङ्गित:

**इ) समासानां नामनिर्देशपूर्वकं विग्रहं कुरुत।** **(०३)**

१) मुग्धजना:

२) श्वेततेज:

३) मन्दाकिनी